विड़ीति।" उणा० १। ११७। इति कालन्।) बृहत्। इत्यमरः॥ (यथा, रघुः। ६। ३२।

"अवन्तिनाथोऽयमुदग्रबाहु-
विंशालवक्षास्तनुवृत्तमध्यः।"

विगतः शालः स्तम्भो यस्य। स्तम्भरहितः। यथा, शिशुपालवधे। ३। ५०।

"गृहैर्विशालैरपि भूरिशालैः॥")

विशालः, पुं, (विश+कालन्।) मृगभेदः। पक्षिभेदः। इति मेदिनी॥ वृक्षभेदः। इति शब्दरत्नावली॥

विशालता, स्त्री, (विशालस्य भावः। विशाल+तल्।) पार्श्वविस्तारः। चओसार इति ख्यातः॥ तत्पर्य्यायः। परिणाहः २। इत्यमरः॥ (यथा, बृहत्संहितायाम्। ४। ८।

"उन्नतमीषच्छृङ्गं नौसंस्थाने विशालता प्रोक्ता॥")

सामान्यविशालत्वम्। इति शब्दरत्नावली॥

विशालतैलगर्भः, पुं, (विशालं प्रचुरं तैलं गर्भे यस्य।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥

विशालत्वक्, [च्] पुं, (विशाला त्वक् यस्य।) सप्तपर्णवृक्षः। इत्यमरः॥ (यथास्य पर्य्यायः।

"सप्तपर्णो विशालत्वक् शारदो विषमच्छदः।"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)

विशालपत्रः, पुं, (विशालानि पत्राणि यस्य।) काष्ठालुः। श्रीतालः। इति राजनिर्घण्टः॥

विशालफलिका, स्त्री, (विशालं फलं यस्याः। ततः स्वार्थे कन्। टापि अत इत्वम्।) निष्पावी। इति राजनिर्घण्टः॥

विशाला, स्त्री, (विशाल+टाप्।) इन्द्रवारुणी। इत्यमरः॥ यथाच।

"विशाला कफवातघ्नी हेमकुष्ठहरा सरा।"

इति राजवल्लभः॥

उज्जयनी। इति मेदिनी॥ उपोदकी। महेन्द्रवारुणी। इति राजनिर्घण्टः॥ (यथा,—

"ऐन्द्रीन्द्रवारुणी चित्रा गवाक्षी च गवादनी। वारुणी च गवाप्युक्ता सा विशाला महाफला। श्वेतपुष्पा मृगाक्षी च मृगैर्वारुर्मृगादनी॥"

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

तीर्थविशेषः। यथा,—

"मुण्डनञ्चोपवासञ्च सर्व्वतीर्थेष्वयं विधिः। वर्ज्जयित्वा गयां गङ्गां विशालां विरजां तथा॥"

इति प्रायश्चित्ततत्त्वम्॥

दक्षकन्या। यथा,—

"मनोरमां भानुमतीं विशालां बाहुदामथ। दक्षः प्रादान्महादेव चतस्रोऽरिष्टनेमिने॥"

इति गारुड़े ६ अध्यायः॥

विशालाक्षः, पुं, (विशाले अक्षिणी यस्य। समासे षच्।) हरः। (यथा, महाभारते।१३।१७।८०।

"ततस्तो भगवान्प्रीतिं पूर्ब्बं जगाह शङ्करः। बहुरूपो विशालाक्षः शिवः स्थाणुरुमापतिः॥")

गरुड़ः। (तदंशीयविशेषः। यथा, महाभारते। ५। १०१। ६।

"अनिलश्चानलश्चैव विशालाक्षोऽथ कुण्डली॥")

सुनेत्रे, त्रि। इति मेदिनी॥ (यथा, महाभारते। ३। ३६। ७०।

"ददामि ते विशालाक्ष चक्षुः पूर्ब्बरूपिभवान्॥")

विष्णुः। इति केचित्॥ (धृतराष्ट्रपुत्त्रः। यथा, महाभारते। १। ११७। ६।

"अपराजितः कुण्डशायी विशालाक्षो दुराधरः॥")

विशालाक्षी, स्त्री, (विशाले अक्षिणी यस्याः।) वरस्त्री। इति विश्वः॥ (यथा, महाभारते। १। ७१। १३।

"यन्नीवितं विशालाक्षि त्वया चन्द्रनिभानने। तन्नाहमुषितो भद्रे कुत्यै कायस्य भामिनि॥")

नागदन्ती। इति राजनिर्घण्टः॥ पार्व्वती। यथा, आदियामले।

ईश्वर उवाच।

"भुवनाद्यं समुद्धृत्य मायाबीजं समुद्धरेत्। विशालाक्षीपदं ङेन्तं हृदन्तं मन्त्रमुद्धरेत्॥ अष्टाक्षरी महाविद्या अष्टसिद्धिप्रदा शिवे। प्रसङ्गात् कथिता विद्या त्रैलोक्यदुर्लभा प्रिये॥ ऋषिरस्या महेशानि सदाशिवो महाप्रभुः। पंक्तिश्च छन्दः कथितं विशालाक्षी च देवता॥ शक्तिः प्रणवमित्युक्तं लज्जाबीजञ्च बीजकम्। धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः॥ अङ्गन्यासकरन्यासौ यथावदभिधीयते। षड्दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत्॥ मूलेन व्यापकं न्यस्य ध्यायेद्देवीं परां शिवाम्। ध्यायेद्देवीं विशालाक्षीं तप्तजाम्बूनदप्रभाम्॥ द्विभुजामम्बिकां चण्डीं खड्गखर्परधारिणीम्। नानालङ्कारसुभगां रक्ताम्बरधरां शुभाम्॥ सदा षोड़शवर्षीयां प्रसन्नास्यां त्रिलोचनाम्। मुण्डमालावतीं रम्यां पीनोन्नतपयोधराम्॥ शिवोपरि महादेवीं जटामुकुटमण्डिताम्। शत्रुक्षयकरीं देवीं साधकाभीष्टदायिकाम्॥ सर्व्वसौभाग्यजननीं महासम्पत्प्रदां स्मरेत्। एवं ध्यात्वा महादेवीमुपचारैः प्रपूजयेत्॥ पुरश्चरणकाले तु वर्णलक्षं जपेत् सुधीः। यन्त्रमध्ये समावाह्य प्रतिष्ठां कारयेत्ततः॥ त्रिकोणञ्चाष्टपत्रञ्च ततो वृत्तं समालिखेत्। चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत्॥ तत्रावाह्य यजेद्देवीं सर्व्वसौभाग्यसुन्दरीम्। विशालाक्षीं विशालास्यां यथाविधि प्रपूजयेत्॥ त्रिकोणान्तर्महादेवीं संपूज्य मातरः क्रमात्। पङ्कजाक्षी विरूपाक्षी रक्ताक्षी चञ्चलोचना॥ एकनेत्रा द्विनेत्रा च कोटराक्षी त्रिलोचना। एताः पूज्या महेशानि पत्राग्रेष्वष्टयोगिनीः॥ पश्चिमादिक्रमेणैव अष्टसिद्धिस्वरूपिणीः। चतुरस्रे महादेवि लोकपालान् समर्च्चयेत्॥ तद्बहिश्चैव वज्राद्यान् पूजयेद्वाञ्छहेतवे। ततो यथाशक्ति जप्त्वा पूर्ब्बवच्च समाचरेत्॥"

इति तन्त्रसारः॥ * ॥

चतुःषष्टियोगिन्यन्तर्गतयोगिनीविशेषः। इति दुर्गार्च्चापद्धतिः॥

विशाली, स्त्री, अजमोदा। इति राजनिर्घण्टः॥

विशिखः, पुं, (विशिष्टा शिखा यस्य।) शरवृक्षः। इति राजनिर्घण्टः॥ बाणः। इत्यमरः॥ (यथा, भागवते। ४। १७। २३।

"सन्दधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा॥")

तोमरः। इति मेदिनी॥ (विगता शिखा यस्य।) शिखारहिते, त्रि॥ यथा,—

"विशिखोऽनुपवीती च यत्कृतं कर्म्म न तत् कृतम्॥"

इति स्मृतिः॥

विशिखा, स्त्री, खनित्री। रथ्या। (यथा, माघे। १५। १७।

"विशिखान्तरायतिपपात
सपदि जवनैः स वाजिभिः॥")

नालिका। इति मेदिनी॥

विशिपं, क्ली, (विशन्त्यत्रेति। विश+"विटपपिष्टपविशिपोलपाः।" उणा० ३।१४५। इति कप्रत्ययेन निपातनात् साधुः।) मन्दिरम्। इत्युणादिकोषः॥

विशिष्टः, त्रि, (वि+शिष्+क्तः। यद्वा, शास+क्तः।) युक्तः। यथा। हस्तानक्षत्रगङ्गारूपगुणदयविशिष्टदशमीविधेयस्मिन् अहनि तल्लाभस्तत्र स्नानम्। इति तिथ्यादितत्त्वे स्मार्त्तभट्टाचार्य्यलिखनम्। विशेषेण शिष्टश्च॥ (यथा, हितोपदेशे।

"समेत्य समतां याति विशिष्टैश्च विशिष्टताम्॥")

विशिष्टः, पुं, विष्णुः। यथा। विशिष्टः शिष्टकृत् शुचिः। इति तस्य सहस्रनामस्तोत्रम्॥

विशिष्टाद्वैतवादी, [न्] त्रि, (विशिष्टं युक्तं अद्वैतं वदतीति। वद्+णिनिः।) प्रकृतिपुरुषयोर्भिन्नत्वेऽपि मिलितयोस्तयोर्ब्रह्मत्ववादी। तस्य मतं यथा। पुरुषस्तदतिरिक्ता प्रकृतिः किन्तूभयमिलितं ब्रह्म चणकद्विदलवत्। इत्थं ब्रह्मणः एकत्वं व्यवस्थितम्। चित् परमाणुस्वरूपो जीवः समस्तविश्वं ब्रह्मांशः। इति माधवभाष्यादिः॥ * ॥ अद्वैतवादिमतं यथा। ब्रह्मैव सत्यं प्रत्यक्षादिसिद्धं विश्वं ब्रह्मणि आरोपितम्। यथा रज्जुः रज्जुस्वरूपाज्ञानात् सर्पवत् प्रतिभाति। तथा ब्रह्मस्वरूपाज्ञानात् विश्वं वस्तुवत् प्रतिभाति। प्रकृतिर्जीवश्चापि पर्य्यवसाने ब्रह्मैव ब्रह्मान्यत् सदस्तु नास्ति। अत्र प्रमाणं शारीरिकसूत्रस्य शङ्कराचार्य्यकृतभाष्यतट्टीकाकल्पतरुभाष्यरत्नप्रभादि॥

विशीर्णः, त्रि, (वि+शॄ+क्तः।) शुष्कः। यथा,

"विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधाकृताः। क्रिमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्॥"

इति तन्त्रसारः॥

विशीर्णपर्णः, पुं, (विशीर्णानि पर्णानि यस्य।) निम्बवृक्षः। इति राजनिर्घण्टः॥